सर्वार्थदृष्टत्वेनोपलक्षितश्चिदात्मा त्वंपदार्थ इति प्रथ
मश्लोकार्थः सर्वं जगत्स्वात्ममायया स्वयमेव विश्व
रूपतया विजृंभयन् सर्वान्तरस्थः सदात्मत्वेनोपल-
क्षितश्चिदात्मा तत्पदार्थ इति द्वितीयश्लोकार्थः इति ता-
त्पर्यम् उपवर्णितपदार्थयोर्हि ऐक्यवाक्यार्थप्रकाशन-
परं तृतीयश्लोकमवतारयितुं प्रश्नमुत्थापयति सत्तास्फु
रत्तेति यदुक्तं सत्तास्फुरत्तेन दृश्यधर्मौ किं न दृश्यधर्मौ
विति तत्रेदं दृष्टान्तमसि यदि दृश्येषु तेन सत्यः कथं तर्हि ते

सत्तास्फुरत्ते भावेषु कुत आगते इत्याशङ्कते
विंवादिदर्पणमायादिति दृष्ट्या निषिध्यते ।

रूपलभ्येते दृष्टानि दृष्टपदवस्तूनि तेषु भासेत इति चेन्ना-
हि किं दर्पणादावित्र वस्तुकोदिदृश्येषु प्रतिबिंबभावा-
भावात इमे तत्त्वेनोपपद्यते मूर्तयोर्हि बिम्बप्रतिबिंब-
भावानुपपत्तेः अतएवं वाच्यः पिण्डादावग्रेरिव संक्र-
मेणानुपपन्नः अतः कथं सन्तं व सत्तास्फुरणे दृष्टन्त्र
सात्मेति दृष्टान्तेन निषिध्य
तदुत्तरश्लोकेनमर्थः ।

यस्यैवेति यस्यैव चिदात्मन एव स्फुरणं स्वरूपप्रकाशः स
दात्मकं सन्मात्रं सदा सर्वानुस्यूतं भासते स्वयमेव स्फुरति चि
च्चिदात्मा दक्षिणामूर्तिस्तस्मै नम इत्यन्वयः स्फुरणविशेष

असत्कल्पेषु भावेषु जडेषूत्पन्ननाशिषु अस्तित्वं च
प्रकाशित्वं निमात्मैकामतीश्वरात् २ आत्मसत्तैव
सत्तैषां भावानां न ततोधिका तस्यैव स्फुरणं चैषां
नात्मस्फुरणतोधिकम् ३

यस्यैव स्फुरणं सदात्मकमसत्कल्पार्थगं भासते
साक्षात्तत्त्वमसीति वेदवचसा यो बोधयत्याश्रितान् २
यत्साक्षात्करणाद्भवेन्न पुनरावृत्तिर्भवाम्भोनिधौ
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ३

इदमत्राकूतम् ॥

णमसत्कल्पार्थविशेषणमिति असत्कल्पो नामसत्ता।
मसन्नेवार्थो विषयो यस्य तत्तथानिर्वचनीयविषयाका
रमर्थः नहि विषयो भासमानः सन्नागमापायित्वाच्छु
क्तिरजतादिवत् नाप्यसन्नसन्नः परोक्षप्रतिभासा।
दर्थक्रियाकारित्वाच्च मायाविनिर्मितनगरादिवदित्यर्थः
तथा च विषयाणां च चिदात्मव्यतिरेकेण स्वरूपानिरूप।
णाच्चिदात्मनि मायाकल्पितान्विषयाकारान्समर्त्तः
रूपादिविवेकज्ञानेनाभिभूय स्वयमद्वयं प्रमसत्ताहितः
समस्तविशेषाकारमात्मानमनुभवंस्तत्त्वमसीति वे।

21

दृढवस्मायश्चाश्रितानुपासकानात्मजिज्ञासून्स्वात्मलाभे
यथति नस्मिंगुरस्वबन्धत्मनुग्रः ज्ञाननिवर्तितत्वादपिप्र
पञ्चरूपोवस्थोः ज्ञानकल्पितोनपरमार्थतइत्यभिप्र
याह यदिति भवांभोधिं याव भोनिधिवदपारः गाधे
उत्तरेभवेसंसारेनपुनरावृत्तिः पुनः संसाराभावदर्शि
नाइत्यर्थः ३ श्लोकव्याख्यानमारभते इदमत्राकूत
मिति अभिप्रेतमित्यर्थः यदुक्तंभावेष्वात्मसत्तास्फुर
णेकृतप्रमात्मसंगतेप्रतिबिंबभावेनवासंक्रमणेन
वासंस्फुरतीति तत्रकिंभावेषुप्रत्यग्दर्पणायःपिण्डा
दिवत्स्थितमात्मेषुकथंसंक्रान्तेनस्फुरतीत्युच्यते किंवा
भावानामेववस्तुतः सत्तास्फुरणसंभवे किंस्वात्मस
त्तास्फुरणसंगमेनेति तत्राद्यंप्रत्याह अमृदिति अ
सत्कल्पत्वेहेतुः जडेष्विति विमतमनिर्वचनीयंस
द्विलक्षणमिति वाजडत्वाच्छुक्तिरजतवदित्यर्थः ज
डत्वेहेतुः क्षणनाशिष्विति विप्रतिपन्नंदृष्टनष्टस्व विमतंजडं
रूपत्वाच्छुक्तिरजतवदित्यर्थः एवंविधेषुभावेषुनि
त्यादीपवदात्मस्वप्रकाशत्वेनसंक्रामति विषयाव
स्थमिवविषयाकारमवभासन्तरजतात्मनेवशुक्ति
सत्तास्फुरणमित्यर्थः अत्रसंक्रमणशब्दोविशेषाका
राबभासाभिप्रायोनप्रवेशाभिप्रायः नहिरजतेसमा
रोपितेशुक्तिसत्तासंक्रामतिसमारोपितस्याधिष्ठान
व्यतिरेकेणस्वरूपाभावादिदमपीतिभावः २ भावानो

ह॰मा॰ मिथ्यात्वप्रसंगं स्पष्टयति आत्मसत्तैवेति यदि दर्पणादिव
टी॰ त्पृथक् सत्ताभावेऽपि प्रतिबिंबः संक्रमो वात्मसत्तास्फुर
२२ णयोः स्यात् तदाऽपि विविधदर्पणावच्छिन्नतयाऽ
पि द्वैवत्त्वाभावः पृथगवभासेऽत्रावभासत्वेऽन आत्म
सत्तास्फुरणाधिकसत्तास्फुरणाभावात्स्वगतार्थाभा
वे सति न प्रतिबिंबः संक्रमो वा कल्पिताऽपीत्यभिप्रायः
द्वितीयं निराकरोति ज्ञानानीति यानि बहुरूपाणि प्र
कारकाणि ज्ञानानि तेषां च ये विषयास्ते सर्वेऽहंकारे साभा
सान्तःकरणवृत्तिविशेषा उच्यन्ते ग्रन्थान्ते सूत्रे मणिग
णा इवेति योजना तथा च सति सच्चिदात्मनि तादात्म्या

ज्ञानानि बहुरूपाणि तेषां च विषया अपि
अहंकारेऽवर्तन्ते सूत्रे मणिगणा इव ४

ध्यासनिष्पन्नान्तःकरणस्यैव विषयसत्तास्फुरणे
न स्वतंत्रमित्यभिप्रायः एवं च परमार्थदृष्टिमाश्रित्य विषया ए
व न सन्ति यत आत्मसत्तास्फुरणं स्वाभासस्य संक्रमणेन तद्व्य
वहारदृष्टिमाश्रित्य स्वाभासान्तःकरणप्रणालिकया स्वस
त्ताद्यनुगमनमन्तरेण न बाह्यविषये सत्तादिरस्तीत्युक्तमि
ति विशेषो द्रष्टव्यः तस्माद्यद्यदधीनसत्तास्फूर्तिमत्तत्तत्परि
कल्पितं यथा जलाधीनसत्तास्फूर्तिमद्बुद्बुदो जलक
ल्पिताः तथेमे भावाः सच्चिदानन्दात्माधीनसत्तास्फू
र्तिकास्तस्मिन्परिकल्पिता इति सिद्धम् ४ ॥

22

संश्रितात्मनोऽनन्तत्वपदार्थयोरद्वितीयत्वं परमार्थमित्यु-
पसंहरति प्रकाशाभिन्नमिति सर्वस्य भवदृष्टजात-
मात्रस्येत्यर्थः ५ विश्वस्य स्फुरितात्मत्वमेव पवनविषयत्व-
मेकमेवतदुपपादयति जानामीति यज्ज्ञानं जानामीत्येवं
सकर्मकतयोल्लिखेत्सा ज्ञानं भावान्विषयान्नाविशद्वर्तते न

प्रकाशाभिन्नमेवैतत्स्थितं सर्वं स्म भासते
लहरीबुद्बुदादीनां सलिलान्नैव काचन स्थि-
तिः ५ जानामीत्येव यज्ज्ञानं भावानां नाविश-
द्वर्तते ज्ञातं मयेति न स्यात्तद्विश्राम्यमन-
न्तात्मनि ६ घटादिकानि कार्याणि विश्रा-
म्यन्ति मृदादिषु विश्वं प्रकाशाविच्छिन्नत्वा-
द्विश्रम्य परमेश्वरे ७

ज्ञानं पश्चादन्तरात्मनि मया ज्ञातमिति विश्राम्यति।
पर्यवस्यतीत्यर्थः ६ तत्र दृष्टान्तमाह घटादिकानीति
दार्ष्टान्तिकमाह विश्वमिति अयं भावः यद्यपीदमहं
जानामि ज्ञातमिदं मयेति च सविषयं ज्ञानं विभाव्यत इति
समानमेव तथापि प्रथमयोगे कर्तुः क्रियया कर्मव्या-
प्तिमात्रं विवक्षितमिति भावानाविशदेवेत्युक्तम् ॥

द.सा. टी २३

द्वितीयं तत्सकर्मकायाः क्रियायाः स्वसमवेतत्वेनानुसं-
धानस्याविवक्षितत्वात्परमात्मनि विश्राम्यदित्यकमिति
यस्य यत्कार्यं तदस्योपरक्ततया भासमानमपि स्व[illegible]ण-
मेव विश्राम्यति कार्यं च कारणत्वात्मनो भिन्नमिति दृष्टा-
न्तदार्ष्टान्तिकयोरभिप्रायः यद्वा विषयगतप्रकाशस्या-
त्ममात्रतामुक्त्वा प्रकाशस्य विषयस्यापि ज्ञानप्रकाशानु-
विद्धतयैव नियमेनोपलम्भात्तद्वात्म[illegible]स्म
मध्यस्थत्वादेव प्रकाशवैशिष्ट्येन भानं विषयाणा[illegible]भि
प्रेत्य दृष्टान्तदार्ष्टान्तिकमाह घटादिकानीति यथा त-

स्वगतेनैव कालिम्ना दर्पणं मलिनं यथा
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ८

याशब्दौ पूर्वोत्तरार्धयोरध्याहर्तव्यौ । यद्येवमद्वि-
तीयमेव तत्त्वं तर्हि कथं सर्वो लोको न प्रमेतीत्याशंक्या-
ऽज्ञानदोषवशादित्यभिप्रायं दृष्टान्तेनोपपादयति स्व-
गतेनैवेति यथा दर्पणगतेन कालिम्ना दर्पणस्वभाव-
श्छाद्यते तथा स्वगतेनानाद्यनिर्वचनीयेनाज्ञाने-
नात्मयाथात्म्यमाच्छाद्यते तेनाच्छादनेन जन्तवो मुह्य-
न्ते मोहं मिथ्याज्ञानं दृष्टादृष्टकार्यकारणादिविभागं
परमार्थविषयकं प्राप्नुवन्तीत्यर्थः ८ ॥

एवं सर्वस्य भेदस्य व्यवहारस्य मूलभूताज्ञाननिमित्तकौ जीवेश्वर
योर्भेदभावेन तत्त्वयिकल्पितमितं दृष्टान्तेनाह घटाकाशेति
यथा स्वभावतोऽनवच्छिन्नस्याकाशस्य घटरूपोपाधिनिमित्तो
ऽयमघटेन कोडीकृतत्वेनांशकल्पनया घटाकाशमहाका
विभागो व्यपदिश्यते घटाद्युपाधिविलये तथा महाकाश इति
परमार्थतस्त्वाकाशस्यामूर्तत्वात्केनचित्परिच्छेदासंभव
नि[illegible]त्मनो देहोपाधिकृतो भेदो दृष्टव्यः
नि[illegible] सर्वात्मनः परिच्छेदस्य परमार्थतोऽनुपपत्तेः तथा
च देहेनाहं मनुष्य इत्यादिप्रकारेण विशेष्यमाणः स एव

घटाकाशमहाकाशौ तदुपाधिकृतौ यथा
तथौपाधिकृतो भेदो जीवात्मपरमात्मनोः १
तत्त्वमस्यादिवाक्यैस्तु तयोरैक्यं प्रदर्श्यते
सोऽयं पुरुष इत्यस्मिन्नुपमानेकः प्रदर्श्यते १

चिदात्मजीवात्मेत्युक्ते स एव तेनाविशेष्यमाण ईश्वर
इति देहादेरुपाधेश्चिदात्मन एव ध्यानमन्तरेण सर्वव्यापिरू
पत्वान्न जीवेश्वरयोर्वास्तवो भेदः संभवतीत्यभिप्रायः १
जीवस्य परमात्मांशत्वं तद्विकारत्वं तत्र तत्त्वपदार्थैक्ये निर
स्यन्ते यस्मादारोपितदेहाद्युपाधिनिबन्धनो भेदः प्रति
भासस्तस्मादेकतादात्म्यापदेशो जीवपरयोर्भेदांशावायने
नशक्यो व्यपदेष्टुमित्याह तत्त्वमस्यादिवाक्यैरिति प्रदर्श्यते
ज्ञाप्यते न तु विधीयते स्वस्यात्मत्वविधानायोगात्सिद्ध
मेवैक्यं विहिताशुपायेन प्रकटीक्रियत इत्यर्थः

द. मा. तत्र लोकप्रसिद्धदृष्टान्तमाह सोयमिति १ वाक्याद्वाक्या
टी र्थप्रत्ययोत्पत्तिप्रकारं वक्तुं प्रथमवाक्यानि विष्णुयोः पद
२४ योर्वाच्यार्थलक्षणार्थयोर्भेदं कथयति यज्जगदिति अपि
दैवावस्थाविक्षेपशक्तिप्रधानमायादिशब्दवाच्याज्ञान
तत्कार्यभूतभौतिकप्रपञ्चोपहितत्वपरोक्षत्वादिध
र्मविशिष्टचिदात्मा तत्पदवाच्यार्थः त्वंपदवाच्यार्थमाह
देहादिभिरिति अध्यात्मावस्थावरणशक्तिप्रधानावि

24

यज्जगत्कारणं तत्त्वं तस्य वाच्यार्थः स उच्यते
देहादिभिः परिच्छिन्नो जीवस्त्वंपदाभिधः ॥
तद्देशकालावस्थादेर्दृष्टः स इति कथ्यते
तथैतद्देशकालादौ दृष्टोयमिति कीर्त्यते २
उमन्तदेतेहेशिष्टं विरुद्धपदयोर्द्वयोः
उमालक्षणमेकं यथा सोयमुमान्वचः ३

विद्यादिशब्दवाच्याज्ञानतत्कार्यदेहद्वयप्रपञ्चोपहि
ततयाः परोक्षत्वादिधर्मविशिष्टचिदात्मा त्वंपदवा
च्यार्थ इत्यर्थः १ परोपाधिविशिष्टस्य वाच्यार्थत्वे दृ
ष्टान्तमाह तद्देशेति स्पष्टार्थः २ वाच्यार्थविरुद्धांश
परित्यागेनोभयथानुगताविरुद्धांश उभयत्र लक्ष्यार्थ
इति मत्वा लक्षणयाखण्डवाक्यार्थबोधनं सोयं देवद
त्त इति वाक्यदृष्टान्तेनोपपादयति श्रुत्येमिति ३ ॥

तदेहशिष्टं स इतिपदनिर्दिष्टपरोक्षदेशकालादिविशि
ष्टं एतदेहशिष्टमयमितिपदनिर्दिष्टमपरोक्षदेशका
लादिविशिष्टमुभयं वाक्यं विरुद्धमनुगतमुभयमुभयमा
यथा सोयं देवदत्त इति वाक्ये लक्षणया स्वरूपमेवं तत्त्वम
सीत्यादिवाक्यमपि स्वपदार्थगतविरुद्धांशपरिहारेणानुग
तचिन्मात्रांशमादायाखण्डं तत्त्वं लक्षयेदित्याह प्रत्यक्त्वे
वेति ४६ एतस्य संबन्धत्रयोपेतं महावाक्यार्थं बोधयती
ति संबन्धत्रयं प्रतिपादयति सामानाधिकरण्याख्य इति

प्रत्यक्त्वं च परोक्षत्वं च स्यात्कात्तत्त्वमसीति वाक्यं त
थैव लक्षयत्येकं जीवात्मपरमात्मनोः ४६ सा
मानाधिकरण्याख्यः संबन्धः पदयोरिह विशेष
णविशेष्यत्वसंबन्धः स्यात्पदार्थयोः ४७ लक्ष्य
लक्षणसंयोगाद्वाक्यमेकं प्रबोधयेत् ४८ ॥

पदयोः सामानाधिकरण्याख्यः संबन्धः सामानाधि
करण्यलक्षणं वक्ष्यति पदार्थयोर्वाच्ययोर्विशेषण॰
विशेष्यत्वसंबन्धः यथा सोयमयं स इति च परस्परभे
दभ्रमव्युदासाय विशेषणविशेष्यभावलक्षणस्तत्त्वपदा॰
र्थयोरपीत्यर्थः ४७ वाच्यांशयोर्विरोधे सति पदयोः सा
मानाधिकरण्ये श्रूयमाणे यदा नोपलभ्यते तदा लक्षण
या वाच्यार्थैकदेशमादाय सामानाधिकरण्येनमख॰
ण्डार्थसिद्धिरित्यभिप्रेत्याह लक्ष्यलक्षणसंयोगादिति

दृ॰मा॰ सन्तक्वैतन्समपद्योलक्ष्यलक्षणभावसंबन्धो लक्ष्यलक्ष-
टी णसंयोगस्तावद्भेदः १९ अत्र लक्षणा त्रिविधा जहल्लक्षणा
२५ ऽजहल्लक्षणा जहदजहल्लक्षणा चेति प्रसिद्धा तत्रैका
लक्षणा इह वाक्यार्थे वाच्यग्राह्येति वीदांयांहती घोषा
शेषविशेषमितरेहैत्रापि नियुक्ष्यति गंगायामिति वाच्या
र्थमशेषतः परित्यज्य तत्संबन्धिमर्थान्तरे वृत्तिर्जह-
ल्लक्षणोच्यते यथा गङ्गापदे स्ववाच्यप्रवाहमशेषवाच्या
र्थस्य परित्यागेन तत्संबन्धितीरं लक्षयति तद्वज्ज
लक्षणा न सम्भवति जडाजडात्मकसंभेदात्मकवाच्य
वाच्यार्थैकदेशपरित्यागेन तत्संबन्धिनः पदार्थ

25

गङ्गायां घोष इतिवन्न जहल्लक्षणा भवेत्
जहल्लक्षणापि स्याच्छोणो धावति वाक्यवत् १९

अस्य लक्षणीयस्याभावात् स्फुटमपर्यवसायि वाक्यम्
स्यात् तस्यानिष्टं अस्मिपदेन सन्मात्रवादिना सममभिव्या
हारविरोधादित्यभिप्रायः अजहल्लक्षणा यत्र न स्याच्छ
शोणो धावतीत्यत्र गुणवाचिना शोणशब्देन तदाश्र
यद्रव्यं स्ववाच्यार्थगुणपरित्यागेन लक्ष्यते नैवमिह स्व
वाच्यार्थापरित्यागेन तत्संबन्धिनिवृत्तिरिति अजहल्लक्ष
णा नहत्स्वार्थापि संभवति विरोधस्य तादवस्थ्यादेक
वाक्यार्थासिद्धेः समानाधिकरण्याच्चायं प्रसंगादिममभि
प्रेत्याह नाजहल्लक्षणापीति १९ ॥

पारिशेष्यान्नजहदजहल्लक्षणैवात्रोचितेति सदृष्टान्तमा
ह तत्त्वमस्यादीति उभयोः पदार्थयोर्जहदजहत्स्वशबलां
शापरित्यागेन सर्वांशगतचिन्मात्रलक्षणया समाधा
नाविरुद्धवाक्यार्थं बोधयतीति तत्त्वमसिवाक्यम् यथा सो
ऽयं पुरुष इति वाक्यं तद्देतद्देशकालस्थावस्थांशपरित्यागे
नोभयावस्थानुस्यूतपुरुषस्वरूपमात्रमादायाविरुद्धमर्थं

तत्त्वमस्यादिवाक्येन लक्षणाभागलक्षणा
सोऽयं पुरुष इत्यादिवाक्यानामिव कीर्तिता ॥
भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकवस्तुनि
प्रवृत्तिस्तु समानाधिकरणत्वमिहोच्यते ॥

बोधयतीति तद्वदित्यर्थः ॥ सामानाधिकरण्यं पद
योः संबन्धरूपकम् तस्य लक्षणं भिन्नप्रवृत्तीति प
र्यायशब्दव्यावृत्त्यर्थं भिन्नप्रवृत्तिनिमित्तानामित्युक्तं
वृत्तिः प्रवृत्तिः घटपटशब्दानामनेकार्थनिष्ठत्वाद्व्या
वृत्तये एकवस्तुनीत्युक्तम् ॥ नन्वेवं तत्पदयोः सामा
नाधिकरण्ये संसृष्टार्थपरत्वेऽपि संगच्छते अतः
किमस्मत्ताप्रसिद्धमखण्डार्थपरत्वमाश्रीयत इ

द.मा. त्तिवेमत्त्ववक्तव्यं किं तत्त्वंपदार्थयोः कार्यकारणत्वादंशां
टी. शिभावसंसर्गः किं वा भूमस्त्वविकारविकारित्वं किं
२९ वा तत्त्वभेदप्रतियोगित्वेन व्याभावोऽथवा साध्ययो... का
र्यकारणभावो जातिव्यक्तिभावो वा गुणगुणित्व... त्वे
वतोपासकतोपासनाकर्मत्वं वा स्वतरस्यास्वतरभावः
कुतस्तु विषयत्वं वा तत्र नाद्यो विरोधात् परसंशोश इति के
य जीवः परमात्मनोंऽशो विकारो वा न भवति ममैवांशो
जीवलोके जीवभूतः सनातन इति स्मृतेः ...
त्मांशत्वावगमात् सर्वे पतन्त्र आत्मानो ऽश्वरन्ती ...
विकारित्वावगमाच्चेति मैवम् प्रवेश... विरोधात्

26

परसंशो विकारो वा जीवो वाक्येन नोच्यते ।
जीवात्मना प्रविष्टत्वात्स्वमायासृष्टमूर्तिषु ॥ ११

दित्याह जीवात्मनेति तत्सृष्ट्वा तदेवानुप्राविशदनेन
जीवेनात्मनानुप्रविश्य स एष इह प्रविष्ट आनखाग्रेभ्यः
स एतमेव सीमानं विदार्यैतया द्वारा प्रपद्यते अन्तः प्र
विष्टः शास्ता जनानाम् अन्तः प्रविष्टं कर्तारमेतमित्याद्य
नेकश्रुतिषु सृष्टेष्वीश्वरस्य स्वसृष्टेषु संघातेषु विकृ
तेष्वेव प्रवेशः श्रूयते अतोऽनेन प्रवेशवाक्यसन्दे
हेनाविरोधाय मायातत्कार्योपाधिकल्पितावच्छेद
भेदमाश्रित्यांशांशित्वं विकारापत्तिश्रवणं चौपचा
रिकं व्याख्येयमित्यभिप्रायः ॥ ११

ननु प्रवेशाकृतेरपि घटे तृणिव फले बीजवद्वा प्रवेशा-
शइष्यस्यात्स्यादेवं कार्यसिसांशीकारे शादिप्रमाणेनावि-
रोधः तिचेत् पतदप्यसत् निरंशत्वनिर्विकारित्वश्रु-
तीयुक्तिविरोधादित्याह निरंश इति निष्कलं निष्क्रि-
यं शान्तं निरवद्यं निरञ्जनम् निर्विशेषं सर्वगतं सुसू-
क्ष्मं तदव्ययमित्यादिश्रुतिभिः अच्छेद्योऽयमदाह्योऽय-
[illegible] यमुच्यत इत्यादिस्मृतिभिश्च निरंशो निर्वि-
[illegible] वोऽयमात्मावगम्यते ज्ञायते इत्येकार्थो जनना
घटकाश[illegible]निरंशो निर्विकारश्चात्मासौ ग्रस्यते इत्यपराध्युक्ति-
स्तावद्[illegible]कृतेः सावयवत्वे तस्यास्य सर्वत्वनियमात्

निरंशो निर्विकारोऽसौ क्रमायुक्त्या च कथ्यते घ-
टाकाशो विकारो वा नांशो वा विद्यते यथा २

एतत्कोटिपातित्वेन जगत्कर्तृत्वव्याहतेः सर्वज्ञत्वसर्व-
शक्तित्वायोगाद्नीश्वरत्वापत्तेः जगत्कर्तृत्वस्यावा-
कर्तृत्वेनाभ्युपगमे स्यात् सकारणं कारणाधिपाधिपो
न चास्य कश्चिज्जनिता न चाधिप इति ईश्वरविषयश्रुतिवि-
रोधप्रसङ्गाच्च तथा विकारोऽपीश्वरे न युज्यते विकारो ना-
मपरिणामः स च स्वतो वा परसंबन्धकृतातिशययोगो वा।
सर्वव्यापिनो नोपपद्यते अमूर्तेनिरवयवे सत्यात्मनि सर्वप्रका-
रस्य विकारस्यानुपपत्तेरिति विभोर्वस्तुनो निर्विकारा।
भावे दृष्टान्तमाह घटाकाश इति ॥

दृ.भा. विमतोनांशविकारवान्विभुत्वादाकाशवदित्यर्थः २०
टी इदानींतृतीयविकल्पमपाकरोति त्वमिन्द्रोसीति
२७ यथानिन्द्रपदवस्तुनिकस्मिंश्चिदिन्द्रत्वारोपेणस्तूयते त्वमि
न्द्रोसीति तथानीश्वरपदवस्तुनोजीवस्येश्वरत्वारोपेणान
स्तूयते तत्त्वमसीत्येवमेतद्वाक्यं भवतिपरमितिनाख
ण्डमितियोजना सदेवसोम्येदमग्रआसीदेकमेवाद्वि
तीयंब्रह्मपेनदात्म्यमिदंसर्वमित्युपक्रमोपसंहारयो

27

त्वमिन्द्रोसीतिवद्वाक्यं नाखण्ड
मितितत्परम् नस्यादृश्यपरे
वाक्यमणिमाणवकादिवत् २१

निरंकुशाद्वितीयत्वश्रवणविरोधाज्जीवस्येश्वराद्भेदा
भावमतित्वेतिकल्पनानवकाशादित्यर्थः वत्तर्थेप
दंश्रुतिद्वियति नस्यादृश्यपरमिति गुणवयवक्रियाणा
ममतममूयस्त्वंसामामंगृहस्यंपनदीश्वरोनिर्गुणोनिरवय
वोनिष्क्रियेकृतस्त्वमितितोनिर्माणवकइतिवन्नसा
दृश्यपरमिदंवाक्यमित्यर्थः २१ ॥

पञ्चसंपन्नत्वमुपलिप्यति नकार्यकारणत्वमस्येति ग्रन्थ
मर्थः निरवयवत्वादेकदेशतायाश्चारंभकत्वानुपपत्तेः
कार्त्स्न्यैकदेशविकल्पासहत्वाच्च परिणामानुपपत्तेः
संघातविवादस्य हरणायासत्वान्न मृद्घटवत्कार्यका
रणभावो जीवेश्वरयोरिति न तस्य रत्नसामान्याधिकर-
णस्येति षड्छयति नजानातीति जीवरूपव्यक्तिषी
सु न जानातीति विकल्पनायामीश्वरस्याज्ञत्वादिवद्देवत
न्वेदमनीश्वरत्वापत्तिः ईश्वरो हि सकलविषयज्ञाने
स्वप्रयत्नवानिति यत्निग्राहकप्रमाणतः सिद्धमतो नेदं
नकार्यकारणत्वस्य साधनं मृद्घटादिवत् नजा
तिव्यक्तिगमकं गोः त्वेण इति बहुचः २२ गुणगु
णात्मकं वाक्यं नेतनीलोत्पलादिवत् नोपासनप
वाक्यं जातिव्यक्ति ंवाक्यं प्रतिमास्वीशबुद्धिवत् २३
रमित्यर्थः २२ नापि समसूत्रमाह गुणगुणात्मकमि
ति ईश्वरस्य जीवगुणकत्वेन विशेषमाणस्य संसारि
त्वापत्तेः सर्वज्ञत्वादिसाधकप्रमाणव्याकोपः जीवस्य
चेश्वरगुणकत्वे संसारित्ववाधानिरुपाकत्वापत्तेरतस्त
द्विषयः साधनविधायि शास्त्रमनर्थकमापद्येतेत्यर्थः
नाप्युत्तमसूत्रमाह नोपासनपरमिति वेदोपासीतेत्यादि
क्रियासमन्वयाभावादुपासनास्वकरणपाठाभावात्सती
निर्दिश्यमभिव्याहारेणासद्रूपमात्रपरत्वपर्यवसानान्निश्च
यात्क्रियान्तराध्याहारानुपपत्तेश्च नोपासनापरमपीदं
वाक्यमित्यर्थः २३

दृ॰ सा॰ नवमत्रुपचारपदं प्रतिक्षिपति नैवौपचारिकमिति पु
टी॰ नः पुनः परिशोधनापूर्वकं नवकृत्वोभ्यासस्योपचारपदैः
२८ संगतेः नह्युपचारप्रयोगेष्वावृत्त्याद्यवकाशः स्मृतो नोप
चारपरमपीदमिदमित्यर्थः तृतीयादिषु समस्तपदेषु
साधारणं हेतुमाह जीवात्मनेति प्रवेशश्रुतिशतेन
परस्यैव संघातप्रवेशवशाज्जीवत्वव्यपदेशभाक्त्वं ततो
र्थान्तरं जीव इति निश्चयेमतिः स्तोत्रस्तोतव्यादिभेदकल्प
नाः नवकाशात्मकारान्तरासंभवे सति जीवत्वाभिमत
स्यात्मन उपाधिकृतजीवत्वापोहनेन तस्य स्वाभाविकब्र

नैवौपचारिकं वाक्यं राजवद्ग्राममूहेषु जीवात्मनाप्र
विष्टो माशीश्वरः श्रूयते यतः २४ देहेन्द्रियमनोबुद्धिप्रा
णाहंकारसंहतौ आत्मसंकल्पनादेहेरात्मत्वं प्रतिप
द्यते वह्निधीः काष्ठलोष्ठादौ वह्निसंकल्पनादिव २५

त्वाद्वबोधकमेवेदं वाक्यमित्यर्थः २४ नह्ययमेव
चेत्सर्वस्यात्मा तर्हि कथमहं ब्रह्मेति निसमात्मात्वप्रति
भासते मनुष्योऽहमित्यात्मन्येव कस्मात्प्रतिभासत इ
त्याशंक्योपाधिविवेकनिबन्धनभ्रमवशादित्यभिप्राये
पाधयोहनत्वं पदार्थशोधनमारभते देहेन्द्रियेत्यादिः
ना श्रौतैरत्राना हृतनिजत्वैर्जीवैर्देहादीनां संहतौ
संघाते आत्मसंकलनात्मेवैतस्थापनादाविर्भा
वादितियावत् आत्मत्वं प्रतिपद्यते संघात आत्मेति ज्ञा
यते न ब्रह्मेत्यर्थः उक्तेर्थे बुद्धिसामर्थ्यं दृष्टान्तमाह वह्निधी
रिति २५

इदानीं स्थूलाद्यन्यतीदर्शनमायेन मुञ्जादिषीकाग्रहण
मायेनचान्नादात्मनः स्वस्वरूपस्याहङ्कारप्रकारमाह देहम
न्नमयं कोशमिति अयमर्थः अहमेवभासोहिप्रत्यगात्
मानमेवगाहते इमाविवादं ममस्थूलत्वादिभिर्देहध
र्मैर्विशिष्टविषयेवर्तमानोनशुद्धमात्मानंशुद्धमात्मा।
नमेवगाहते अतः परिच्छिन्नोजीवात्माकथंव्यापकः
परमात्माभवितुमर्हतीत्यसंभावनाजायते ततश्चाहङ्का
रगृहीतस्पष्टदंशविशिष्टस्याहङ्कारमात्रिवेनेदमंशत्र
हाणेनोद्धरणे सम्यगहङ्कारनिरपेक्षः स्वयंप्रकाशमाना
देहमन्नमयं कोशमाविशनात्माप्रकाशते स्थूलो
बालः कृशः कृष्णो वर्णाश्रमविकारवान् प्राणको
शेपिजीवास्मित्त्वथिनोऽस्मिपिपासितः २५ संशितो
निश्चितो मन्यऽइति कोशे मनोमये विज्ञानमयको
शस्थो विजानामीतितिष्ठति २६
त्माशुद्धः परमात्मे
वेति ज्ञातेशकातऽइति तत्रान्नमयप्राणमयमनोमयवि
ज्ञानमयानन्दमयेति पञ्चकोश अहमेवभासविषयत
याप्रसिद्धास्तेष्वोऽस्मत्स्वात्मानीप्रत्यगात्मेतिशुद्धोनिर्वि
शेषः सिद्ध्यति २७ कथं स्थूलोहं कृशोहं बालणोहंब्र
ह्मचार्यहमितिविशिष्टविषयेहंकारोतिवहिष्ठः २८
तृथिनोऽस्मिपिपासितऽइतिप्राणधर्मेविशेषविषयस्तेनो
ऽन्तरः उपलक्षणमेतत् पश्यामि शृणोमीत्यादीन्द्रि
यधर्मेविशिष्टविषयत्वस्य २९ संशितः संशयवान्

द॰ मा॰ टी॰ २९ निश्चितोनिश्चयवानस्मीति मनोमयविशिष्टत्वविषयः
प्राणमयादनन्तरं मनोमयकोशावगाही अहमिदं ज्ञा
नामि करोमीति चैवमादिप्रकारेण मनसोऽनन्तरं विज्ञा
नमयकोशमवगाहत २८ येनाहंकारेणात्मचैतन्यमव
वितेनेतरे सर्वे कोशा अवभासन्ते सोऽहंकारो नन्दमयको
शस्तस्मिन्नानन्दमयकोशाख्ये तस्य विज्ञानमयकोशा
न्तर्गतस्यानन्दमयत्वेनावविशेषावयवत्वेन मिलनमाह

29

आनन्दमयकोशेऽस्मिन्नहंकारे पुराकृतैः पु
ण्यैरुपासनाभिश्च संवृतोस्मीति मोदते २७
एवं कञ्चुकितः कोशैः कञ्चुकैरिव पञ्चभिः प
रिच्छिन्न इवाभाति व्यापकोऽपि परमेश्वरः २८ य
था सलिलमाविश्य वक्रुथा भाति भास्करः ॥

पुराकृतैः पुण्यैरुपासनाभिश्चेति २९ एवं कोशपञ्चक
मनुयत तत्कृतपरिच्छेदमुदासेन तदनुस्यूतमाद्वितीयमा
त्मानं स्वयं परिपूर्णं वादी सर्वप्रवेशमात्मतत्त्वमावेदयति ए
वं कञ्चुकित इति ३० तदेवमात्मनः परिच्छेदावभासको
पाधिनिबन्धनत्वात् स्वतोऽपरिच्छिन्नः परमात्मैवेति प्रति
पाद्य तस्य प्रतिशरीरं भेदप्रतिभासोप्युपाधिभेदनिबन्ध
नो न स्वत इत्येतद्दृष्टान्तेनोपपादयति यथेति ॥

यथाबहुषु जलभाजनेषु प्रतीयमानस्य भानुबिंबस्य जलो
पाधिपरामर्शमन्तरेण स्वतो भेदो न निरूपणपथमवतरति
तथानेकेषु लिङ्गदेहेषु स्फुरन्तमात्मबिंबस्यापि देहोपा
धिपरामर्शमन्तरेण स्वतो भेदो न निरूप्यते अतः सर्वशरी
रेषु परमार्थत एक एवात्मा परिपूर्णोस्तीति सिद्धम् एतेन
दमपि निरस्तं यदाहुरेकात्मवादे एकस्मिन्सुखिते सर्
वे सुखिनः स्युरित्यादि जलगतप्रतिबिंबानामन्यतमे कंपा
दिमत्यपि विभाव्यमानेऽन्येषां तद्वत्ताया अभावनिश्चयाय
थायमेव व्यवस्था एवं जीवेष्वपि सुखस्योपपत्तेः जीवस्व
यारवतेपि यमेभेदव्यवस्थायामयमेव दृष्टान्तः यथा प्रति

तथा शरीराण्यविश्य बहुधा स्फुरतीश्वरः ४१ का
रणत्वं च कार्यत्वं तटस्थं लक्षणं तयोः शाखाग्रचन्द्र
बिंबचलनादिमत्त्वपि न तिवन्नैव वस्तुधर्मत्वमिदं मतम् १

भानुश्चलनादिमान्न भवति तथा जीवैकत्वे तत्संसारधर्मैर्व्या
तेष्वाभासमानेष्वपि न परमात्मा तद्धर्मवान्भवति ४१ तदेव
मात्मनः परिच्छिन्नमनेकत्वमीश्वरादन्यत्वं चोपाधिवशात्
प्रतिभासते न वस्तुतस्तस्यैते धर्माः सन्तीति प्रतिपादयितुमिदा
नीं जीवेश्वरयोस्तटस्थस्वरूपलक्षणप्रदर्शनद्वारा तयो
रैक्यमेवाकार्थं द्वयोरपि तोसंभावयति कारणत्वमित्यादि
ना तयोस्तत्त्वतस्तटस्थोपलक्षणं देहेन्द्रियादिसंघातस्वरूपका
र्योध्यदतत्त्वं च पदार्थोपलक्षणमित्यर्थः उक्तलक्षणमिदमु
भयोः सद्भावनामात्रहेतुर्न स्वरूपपर्यवसायीत्येतद्दृष्टान्तेन स्प
ष्टयति शाखाकोणमिति १

ॐ मा. टी ३.

स्वरूपपर्यवसायिलक्षणं सदृष्टान्तमाह महाप्रकाश इति
यथा प्रकृष्टप्रकाशश्चन्द्र इति चन्द्रस्वरूपलक्षणेन तद्वि-
शिष्टार्थपरं चन्द्रप्रातिपदिकार्थमात्रमुक्तं यथा प्रकृतप्रश्नो
त्तरत्वेनास्य प्रवृत्तेः वैशिष्ट्यपरत्वेऽनुपयुक्ततयाविषयत्वे
नानवधेयवचनतापत्तेः यः प्रकृष्टप्रकाशः स चन्द्र इति
निर्देशोपलक्षणयोः सामानाधिकरण्येनैकार्थत्वनिय

30

महाप्रकाश इत्युक्तं स्वरूपं चन्द्रल
क्षणम् सच्चिदानन्दरूपत्वं स्व
रूपलक्षणं तयोः ३ ॥

मात्र प्रकृष्टप्रकाशचन्द्रपदयोः स्वरूपमात्रपर्यवसान
स्यावश्यंभावाच्चन्द्रस्वरूपलक्षणमखण्डं चन्द्रप्रातिपा
दिकार्थमात्रं बोधयतीत्युक्तम् तथा तयोस्तत्त्वंपदार्थ
योः सच्चिदानन्दस्वरूपत्वं स्वरूपलक्षणमनृतजडदुःख
परिच्छेदविरोधिसच्चिदानन्दानन्तरूपतात्तत्त्वंपदा
र्थस्वरूपमित्यर्थः ३।

तथाच कार्यकारणलक्षणोपाधिद्वयप्रहाणेन विरोधा-
भासे बाधिते सति सच्चिदानन्दस्वरूपस्वभावमात्रे भेदले-
शस्याप्यभावादेकलक्षणयोगित्वेनैकवाक्यार्थप्रतिप-
त्तिर्येषणतानयोरुक्तेति वाक्यार्थमाह एकलक्षणयोरि-
ति एतावता सा शास्तत्त्वमसीति वेदवचमेति द्वितीयः पा-
दो व्याख्यातः इदानीमुक्तं वाक्यार्थं तत्त्वमनूद्य तृतीयपा-
दं व्याचष्टे तस्मादित्यादिना एकप्रकाशत्वमेकत्वं प्रकाश

एकलक्षणयोरैक्यं वाक्येन प्रतिपाद्यते तस्मा-
देकप्रकाशत्वं सर्वात्मत्वमिति स्थितम् २२
देवतिर्यङ्मनुष्याणां प्रकाशात्पृथक्स्थितिः
जीवः प्रकाशाभिन्नत्वात्सर्वात्मेत्यभिधीयते २३

रूपत्वं एकरूपप्रकाशत्वमिति वा इदमेव सर्वात्मत्वं तद्-
दात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्सर्वमभवदि-
त्यर्थः श्रुतावुक्तं नानेकरूपापत्तिरिति स्थितं निश्चिता-
मित्यर्थः २२ कथमेतन्निश्चीयते देवमनुष्यादिभेदस्या-
विद्यमानत्वादिमांशङ्काशङ्क्य प्रतिपादितमर्थं ज्ञापयति
देवेति जीवोऽपि परमेश्वरप्रकाशात्पृथक्न स्वरूपाभावा-
त्सर्वमात्मैवमाह जीवेति २३ ॥

द॰मा
टी
३१

एवंवाक्यार्थतत्वमनुष्ठितज्ञानफलमाह एवंप्रकाशे
ति १४ एवंजीवब्रह्मणोरेकत्वज्ञानमाहात्म्यकोषसम
येनाह सकृदिति यदृच्छया प्राचीनपुण्ययोगेनाकस्मा
न्नहि स्वयमतिप्रावृण्येन सर्वात्मत्वे सकृत्सकृत्मात्रेत्व
मात्सर्वपापविनिर्मुक्तः शिवलोके महीयते पूज्य इति
व मुक्तो भवतीत्यर्थः सर्वभावविनिर्मुक्त इति पाठेनिष
विषयभावनाविनिर्मुक्त इत्यर्थः १५ सर्वात्मभ
भावनात्वगमस्यवेदान्तफलं तदभ्यासस्य ...
कारणं संसारनाश इति किंपुनर्वक्तव्यमित्याह सर्वात्म

एवंप्रकाशरूपत्वे परिज्ञाते दृढीकृते पुनरावृत्तिर
हिते कैवल्यपदमश्नुते १४ सकृत्सकृन्मात्रे वापि
सर्वात्मत्वे दृढेच्छया सर्वपापविनिर्मुक्तः शिवलो
के महीयते १५ सर्वात्मभावनायस्य परिपक्वा
महात्मनः संसारो नारकः साक्षात्स एव परमेश्वरः

वनायस्येति १६ तृतीयश्लोकव्याख्यामुपसंहरति इ
तीति १७ तृतीयो वृत्तान्तः ३ नदेवं त्रिभिः श्लोकैस्तत्त्व
पदार्थाः संशोध्य तदैक्यं वाक्यार्थः प्रतिपादितः एषसर्व
वेदान्तानां समन्वयः प्रथमः शास्त्रार्थो दर्शितः इदानीमुक्त
समन्वयार्थो ब्रह्मात्मा हि तत्त्वे विरोधकाप्रमत्तादिप्रमा
णाभासनिबन्धनां वादिमतिविलासनिबन्धनांच प्रतिदि
ष्टमेवोक्तं समन्वयार्थं दृढीकर्तुं मुत्तरश्लोकत्रयं प्रवर्तते

तत्रात्मसत्तैव सत्तैषां भावानां ततोधिका तथैव स्फुरणं चै
षां नात्मस्फुरणात्तोधिकमिति यदुक्तं पूर्वं सर्वभावानां
शा[illegible]ः सत्तास्फुरणराहित्यं तदत्यन्तविरुद्धं तथाहि घटो
स्तिये[illegible]ः स्फुरतीति वानुभवाद्वा घटदर्शनाच्चेति प्रत्ययस्य सा
ति प[illegible] स्वत एव सन्तः स्वत एव प्रकाशन्ते नेश्वरस्य समा
दिभ्या[illegible]नाद्दर्शनानां कल्पनायां प्रमाणाभावाच्चेत्यर्थः
दृष्टावेष[illegible]य स्यात्तत्रैवोत्तरश्लोकमवतारयति अस्योत्तर

इति श्रीदक्षिणामूर्तिस्तोत्रार्थप्रतिपादके प्रबन्धे
मानसोल्लासे तृतीयोल्लाससंग्रहः ३० २ स्वतः स
न्तः प्रकाशन्ते भावा घटपटादयः नेश्वरस्य समा
वेशादित्यस्योत्तरमुच्यते । अस्यायं भावः अस्मि
न्नुत्पन्ने तानि जानामीति नैवेत्स्फुरेत् कस्यको
वा प्रकाशेत जगत्स्याश्वसद्भुमिवत् २

मिति । नानाच्छिद्रेति नानानेकरूपाणि छिद्राणि य
स्मिन् स नानाच्छिद्रः स चासौ घटश्चेति तथा तस्योदरे मध्ये
स्थितो यो महादीपो हृद्दीपस्तस्य प्रभावद्भास्वरमनसा
धनाः ल म प्रकाशस्वभावस्य चिदात्मनोनेकच्छिद्रव
ति देहे स्थितस्य ज्ञानं स्वरूपभूतं चक्षुरादिकरणद्वारा नत
दिन्द्रियच्छिद्रमार्गेण बहिर्विषयेषु रूपादिषु स्पन्दते गच्छ
ति यथा घटच्छिद्रेभ्यो विप्रसृता दीपप्रभा तत्तन्निहिता

दृ·मा टी ३२

विषयान्प्राप्य तदाकाराः सन्तस्तत्तमोभिभवन्ति त
थादेहच्छिद्रगतेन्द्रियद्वाराप्रसृत्य मनोवृत्त्यवभासकं तथा
तदात्मतामापन्नानि चिदात्मस्वरूपाणि ज्ञानानि स्फुरण
स्वभावानि तत्तदर्थं प्राप्य तदाकाराकारितानि विषयगता
ज्ञानतामभिभवन्ति विषयप्रकाशरूपाणि भवा
न्तीत्यर्थः यस्य ज्ञानप्रकारमेवं प्रकारेण बहिः स्पन्दते
तस्मै इति संबन्धः उक्तमर्थं क्रमात्स्पष्टयति जानामीति
अहमिदं जानामीति स्वगतेन निरपेक्षप्रकाशरूपेण विष
यमवभासयन्स्वयमेवभासते तमेवभान्तं प्रकाश

नानाछिद्रघटोदरस्थितमहादीपप्रभाभास्वरं
ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिः स्पन्दते
जानामीति तमेव भान्तमनुभात्येतत्समस्तं जगत्
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ४

मानमनुभात्येतत्समस्तं जगद्भाति न स्वतः इत्यत्र श्रुतयो ज्ञा
तथा च श्रुतिः न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्यु
तो भान्ति कुतोऽयमग्निरिति सर्वप्रकारप्रकाशकाविषया
त्वात्स्वप्रकाशत्वप्रमाणलक्षणोपपाद्य तमेव भान्तमनु
भाति सर्वं तस्य भासा सर्वमिदं विभातीति भासमानात्मप्र
काशानुविद्धमेव सर्वं जगदवभासत इति निर्धारयति तथा
चैतत्समस्तं जगद्दृश्यं दृश्यत्वाद्घटवदिति तं भान्तमनु
सर्वं भातीत्युच्यते तदेवैकं सर्वविषयभानं तत्पुनर्विषये
षु भानान्तरं स्वतः परतश्चापेक्षत इति तात्पर्यार्थः ४

32

श्लोकव्याख्यां प्रतिजानीते प्रस्तावमावहति तत्र जा-
नामीति तृतीयपादभावार्थं वर्णयन्नीशस्य सर्गवि-
नाविषयसत्तास्फुरणयोरङ्गीकारे बाधकं वक्ष्यमा-
णस्य स्वप्रकाशात्मरूपतां साधयति अहमिममनु-
सन्धातेति जानामीत्यनुसन्धाता इमिति न चेत्स्फु-
रेदिति सम्बन्धः यद्वा जानामीत्यस्मिन्नवभासे इममि-
मनुसन्धाता चेन्न स्फुरेदिति सम्बन्धः तदा जगदात्मे
प्रसमेतेऽन्तरार्थार्थः एतदुक्तं भवति विषयाद्-
स्वत एव प्रकाशेऽस्त्यदाहं जानामीति ज्ञानाश्रयत्वे-
न विषयानुसन्धातुः स्फुरणं न स्यात् तदभावे शिला-
घनपिहितगृहागतदीपवत्सर्वा विदितोयमिति क-
स्यापि नावभासेत तथा च सकलभावा विना प्रकाशमान-
स्य जगतः स्फुरणाभावात्तद्व्यवहारलोपप्रसङ्गः
सतो भावाधीनस्फुरणं जगतोऽभ्युपेयं यदधीनश्चास्य प्र-
काशः स निजप्रकाशरूप एवाभ्युपेयः तस्याप्यप्र-
काशत्वे अनवस्थाप्रसङ्गादिति २ ॥

ई·प्र· विषयाणां प्रकाशवत्त्वमपि पराधीनमित्यत्र युक्तिमा
टी ह प्रागूर्ध्वेति यद्वा विषयाणामनन्याधीनप्रकाशत्वे वि
३३ षयत्वानुपपत्तिप्रसंगमापाद्यानन्याधीनसत्तायामपि
तमापादयति प्रागूर्ध्वेति विमता भावा न स्वतः सत्ता
वन्तः कदाचिदेवोपलभ्यमानत्वाच्छुक्तिरजतादिव
दित्यर्थः तथाच प्रकाशवत्सत्ताप्यन्याधीना भावाना
मिति सिद्धमित्याह तस्मादिति अनन्याधीनसत्ताक

प्रागूर्ध्वं वासतो सत्त्वं वर्तमानेऽपि न स्वतः
तस्मादीशाश्रितं सत्त्वं प्रागूर्ध्वत्वविवर्जितं
सू ३

स्यात्मवदनन्याधीनप्रकाशत्वापत्तौ विषयात्वानु
पपत्तिरिति ईश्वरस्य तु न प्रागूर्ध्वं वासत्त्वशंका प्रका
शशंका वा स्यात्सर्वभावानामागमापायावधित्वेन त
स्य सदा सत्त्वात्सर्वावस्थासाक्षिप्रत्यगात्मरूपेण स
दा प्रकाशमानत्वाच्चेति भावः ३ ॥

विषयत्वाम्यष्यात्रुपपद्येद्वेषां स्वाधीनासत्तास्फुरत्ता च वि
षयाणामाश्रयेयस्तकं इदानीं तदेव स्फुटयति स्वयमे
वेति विभेदवदिति स्वतःसिद्धप्रकाशकस्वग्राहकम
न्येक्षस्यार्थः सर्वं सर्वस्य भासेत किंचिद्ग्राहकस्य वि
न्नभासता ४ मा च भासिष्ट किं तत इति चेन्नाह तस्मा
त्सर्वतमिति यदि सर्वं सर्वस्य सदा भासेत तदा सर्वज्ञः
[illegible]दि नैव भासेत तदा सर्वोप्यज्ञ एव स्यादिति योजना ५
[illegible]याणामप्यात्मवत्स्वयंप्रकाशत्वे दूषणान्तरमाह

स्वयमेव प्रकाशेरन्नर्था यदि विभेदवत् सर्वं सर्वस्य
भासेत न च भासेत किंचन ४ तस्मात्सर्वस्तमेकं चाप्य
गम्यादेकरूपकं ५ न त्वेषां स्वयंप्रकाशत्वे जडचेतन
योर्मिथः तुल्यमेव प्रसज्येत ग्राह्यग्राहकतादयः
६ इन्द्रियाणामनियमाच्चात्मनः स्वरसादयः म
लिनामलिनादर्शपश्चात्सार्गाभागतुल्यया २

तुल्य इति ६ ग्राह्यग्राहकव्यवस्थानंगीकारे दोषमाह
इन्द्रियाणामिति सर्वस्य सर्वं ग्राह्यत्वे ग्राहकत्वे च द्व
यिरसादिग्राहकस्याद्रसादयोपि च द्वग्राहकाः स्युरित्यर्थः
तस्माद्विषयविषयिव्यवहारनियमस्य सर्वस्वप्रकाशत्ववा
दे विलोपप्रसंगात्स्वतः सत्तायां च विषयाणां स्वरूपाव्यभि
चारित्वप्रसंगादस्वाधीनसत्तास्फूर्तिका विषयाः प्रमातृप्रमा
तः सत्तास्फुरत्ताभागीश्वर एव नामस्य इति सिद्धमिति पर्यव
सितोर्थो बोद्धव्यः २

प॰सा॰ नन्वीश्वरोभावेषु सत्ताप्रकाशयोर्व्याप्रियते न वा । न वे
टी त्स्वभावानामीषे सन्निहितोप्याकाशवदकिञ्चित्-
३४ करत्वाद्व्याप्रियते चेद्विकारित्वापत्तावनित्यत्वादनीश्वर-
त्वप्रसंग इति चेन्नायं दोषः स्वतो निर्व्यापारत्वादुपाध्या-
यत्तव्यापारारोपाश्चेति मत्वा कर्तृत्वज्ञातृत्वे ईश्वरस्यो-
पपादयति मलिनामलिनेति मलिनश्चामलिनश्च म-
लिनामलिनौ आदर्शस्य पश्चात्पुरोभागावमलिनादर्शप-
श्चात्पुरोभागौ वा मलिनामलिनौ च तावादर्शपश्चात्पुरोभा-
गौ चेति तथा तत्त्वयोरिति विग्रहः । एवंविधयोः क्रिया

34

क्रियाशक्तिज्ञानशक्त्योरन्तःकरणभागयोः
प्रतिबिम्बे स्फुरन्नीशः कर्ता ज्ञातेति कथ्यते ८

शक्तिज्ञानशक्त्योरन्तःकरणस्य लिंगस्य भागयोः क्रिया-
शक्तिरूपो भागः प्राणः स आदर्शस्य मलिनपश्चाद्भागतु-
ल्यः ज्ञानशक्तिर्मनोबुद्ध्यात्मके भागः स आदर्शामलिन-
प्राग्भागतुल्य इति विवेकः भागयोरिति सप्तमी द्विवच-
ने तयोः प्रतिबिम्बः प्रत्यगात्मनः प्रतिच्छाया तस्मिन्प्र-
तिबिम्बे स्फुरंस्तत्प्रतिबिम्बाभेदेन स्फुरन्नीश आत्मा
कर्ता ज्ञातेति च कथ्यते मायावश्यप्राणोपाधिसत्तास्फूर-
तिप्रदत्वेनानुगम्यमानश्चिदात्मा करोतीति व्यपदिश्यते
परिणामस्थानमन आद्युपाधिसत्तास्फूर्तिप्रदत्वेनानुग-
म्यमानो जानातीति व्यपदेशभाग्भवतीत्यर्थः ८

अत्मनो ज्ञातृत्वोपाधित्वेन शक्तिरन्तःकरणमित्युक्तं प्र
पञ्चयति बुद्धिरिति बुद्धिः स्वगतात्मच्छायानुभावतो वि
षयच्छायां गृह्णातीति संबन्धः तत्र हेतुः सत्वेति रज
स्तमसोर्हि उद्रेको लोभप्रमादादयो जायन्ते तन्माभूदिति
सत्वगुणोत्कर्षादित्युक्तं तथा च भगवानाह सत्वात्सञ्जा
यते ज्ञानं रजसो लोभ एव च प्रमादमोहौ तमसो भवतोऽज्ञा
नमेव चेति १ इन्द्रियेष्वेव विषयग्रहणोपाधिषु सत्स्वपि कि
मुद्धेः प्राधान्यं तेषामपि तया विना नोपाधित्वमित्यभिप्र

बुद्धिः सत्वगुणोत्कर्षान्निर्मलो दर्पणो यथा
गृह्णाति विषयच्छायामात्मच्छायानुभावतः १
अन्तःकरणसंबन्धात्सर्वाणीन्द्रियाण्यपि
रथाङ्गनेमिवलये कीलिता इव कीलकाः १

माह अन्तःकरणेति स्वभावतो बहिर्मुखप्रवृत्तानामिं
द्रियाणां प्रवृत्तमङ्कुशाभावेऽपि विषयनियमाभावादन्तः
करणस्य तेषां नियामकत्वमुक्तं तथा च रथाङ्गस्य रथच
क्रस्य नेमिसंज्ञे वलये कीलिता अर्पिताः कीलका अरा इव
स्वस्वविषयेषु निखिलान्यपीन्द्रियाण्यन्तःकरणेन नाभि
स्थानीयेन नियामकेन संबन्धादर्पितानि भवन्तीत्यर्थः १

द॰मा॰
टी॰
३२

इदानीं देहान्तरान्तःप्रविष्टं तथा जीवभावमिवापन्नस्य
स्वरस्योक्तोपाधिद्वारावस्थास्त्रयोगवदिष्यं तदनुभवस
न्धानस्थानमाह देहपञ्चयति नाड्यइत्यादिना नाड्यो दे
हान्तरालगताः सिराग्रन्थः छिद्राः स्नावाख्याता ग्रन्थः
करणैर्ज्ञानक्रियाशक्तिसंमूर्च्छितालिंगस्थतारोपिताः
तत्र दृष्टान्तः जालमत्स्यन्तमस्त्रवदिति यथा मत्स्यावरो
धसाधनं जालं प्रतिष्ठितं तत्र मत्स्यकर्षो तानि सूत्राणि पर
स्पराविनाभूतानि तथा सर्वविषयावरोधनसाधनेनाड्य
तिसमस्तः करणेनाड्यः प्रोतावर्तन्त इत्यर्थः नाभिनो

नाड्योन्तः करणस्थता जालमस्त्तमस्त्रवत् ना
भिस्तगोलकान्ताभिः प्रसर्पन्ति स्फुलिङ्गवत् क
रणानि समस्तानि यथास्वं विषयं प्रति ॥ देह
स्य मध्यमस्थाने मूलाधारः तीर्थेते गुदात्तद्व
ङ्गुलाद्रुर्ध्वमेढ्रात द्व्यङ्गुलादयः १२ ॥

डीभिर्द्वारभूताभिः एवैतानि करणानि समस्तानीन्द्रि
याणि मनोवृत्तिभिः सह यथास्वं विषयं प्रति प्रसर्पन्ति स
न्चरन्ति किं समर्थं नाभिरित्युच्यते गोलकान्ताभिरि
ति इन्द्रियायतनमिन्द्रियाभिव्यक्तिस्थानं देहदेशविशे
षरूपं गोलकं तत्समर्थं नाभिर्नाडीभिः प्रसर्पन्तीत्यर्थः स्फु
लिङ्गवदिति दृष्टान्तः स्पष्टः गोलकान्ता नीतिपाठे कर
णविशेषणम् सुषुप्ते जागरितेन प्रसङ्गमेनेगोलका
न्तपर्यन्ता भवन्तीत्यर्थः ॥ १२ ॥

नाडीद्वारेन्द्रियाणि सञ्चरन्ती सुखं तत्र कानाडी किंयत:
किंपरिमाणा इति जिज्ञासायामाह देहस्येति मध्यमस्थानं
मध्यदेशः तदेव विशिष्य निर्दिशति गुदादिति गुदं पायुः
मेढ्रं शिश्नः तस्य मूलाधारस्थलं लक्षणमाह त्रिकोण इति
तदेव मारुतस्योर्ध्वाद्वृद्धिमारोहयति कमलेति तस्याधिष्ठा
त्रीदेवतां नामरूपाभ्यां निरूपयति यत्रेति पराशक्तिर्मूल
प्रकृतिः सा तत्र स्थिता सर्पकुण्डलाकारा कुण्डलिनीसंज्ञि
ता परमात्मतेजसा दीप्ता सती प्राणादीनां प्रसवित्री प्राणः
पञ्चरत्निको देहान्तः सञ्चारी वायुविशेषः अग्निः को

त्रिकोणो योस्वाग्रस्थकमलकायोनिसन्निभः
यत्र कुण्डलिनी नाम पराशक्तिः प्रतिष्ठिता १२
प्राणाग्निविन्दुनादानां प्रसवित्री सरस्वती १४

ष्ठुगतोऽस्यात्मरूपोन्तरसादीनां पावकः एतौ प्राणाग्नी श्रु
ग्नीषोमौ चन्द्रसूर्याविति च योगशास्त्रे प्रसिद्धौ तत्र प्राण
स्वल्मासोमः इति बोध्यते अग्निः सूर्य इति एतौ च वस्तु
माणेडापिंगलयोर्देवते विन्दुरग्न्यर्करूपो ध्मवस्थावि
शेषः नादस्तु सर्ववर्णसाधारणाकारो घोषात्माध्यक
र्णोवपिपायष्ट एवन्ति एतेषां प्रसवः सञ्चारस्तत्कर्त्री
पराशक्तिर्देहमध्यस्थिता कुण्डलिनीसमर्थः सर्वप्राण
घोषावस्थां प्राप्य वर्णात्मनाभिव्यज्यमाना सरस्वतीत्युच्यते २४

एवं वसमाणस्य महानाडीत्रयस्य मूलं मूलाधारं सोपस्कारं व्याख्या
नायोपदिशेदानीं ततो मध्यनाडीनिर्गमं सुषुम्णापदिशति मूलेति
मूलाधारस्य हि कोणत्रययुक्तं तत्राग्रकोणोऽधः कोणं तु एव
तत्र स्थिता अभ्यस्तमावस्थिता जानीतेति यावत् सुषुम्णाख्यो ना
डी सा ब्रह्मरन्ध्रे शिरःकपालच्छिद्रे तमर्ध्वं ततो गता एकरूपा
तिष्ठी वेणुरज्जीवेत्यर्थः तस्या योगिगम्यं लक्षणमाह मूले
ति अर्धच्छिन्नवंशवदाभासमानामूलेऽस्मिन्स्यादित्यर्थः ष
ड्गिराधारैरुल्लेभकैः समन्विता मूलाधारस्वाधिष्ठानमणिपूर
कानाहतविशुद्धाज्ञाख्यैः क्रमेण चतुः षड्दशद्वादशषोड

मूलाधाराग्रकोणस्था सुषुम्णा ब्रह्मरन्ध्रगा मू
लेऽर्धच्छिन्नवंशाभा षडाधारसमन्विता १९ त
स्याः सव्यकोणयोर्जाते इडापिङ्गलास्थिते नाडीच
क्रमिति प्राकृतास्यान्ताडः सुगुम्फिता: १९ ॥

शद्विदलकमलमयैर्मूलाधारलिङ्गनाभिहृदयकण्ठभ्रू
मध्यदेशगतैः समन्वितेत्यर्थः १९ सुषुम्णासन्निहितं ना
डीद्वयमाह तस्याश्चेति तस्याः सुषुम्णायाः पार्श्वयोः को॰
कोणे मूलाधारस्य त्रिकोणस्य दक्षिणेतरात्परिभागात्
योर्जाते निर्गते इडापिङ्गले नाड्यौ स्थिते वामपार्श्वे इडा द॰
क्षिणपार्श्वे पिङ्गलेत्यर्थः एते च ललाटमूलपर्यन्तं प्र
सृते इति ज्ञेयं उक्तमेतन्नाडीत्रयसन्निवेशलक्षणं नाडी
चक्रमिति प्राकृत्य योगशास्त्रविद इति शेषः तस्मान्नाडीच
वसमाणाः समनुगुम्फिताविभक्ता जायन्त इत्यर्थः १९ ॥

36

ताएवनाडीः प्रधानत्वेनाभिनिर्दिशति गान्धारीसा
हिता प्राधारचक्रान्निर्गतेन नयनगोलकान्तं प्रसृते इ
त्यर्थः एतद्गान्धारीहस्तिजिह्वाभ्यां यदा नाडीचक्रेण प्र
वीक्षितेन संसृते ग्रथिते भवेतां तदोभयते नासिकान्तग
ते भवतः इडापिंगलयोर्वायुप्रसरणेनाधोमुखतावस्था
यां ताभ्यामुन्मीयमानाऽसौ मानासिकान्तमुन्मीयन्ते इ
त्यभिप्रायः यद्वा गान्धारीहस्तिजिह्वावेष्टो नाडीसा।

गान्धारीहस्तिजिह्वा च नयनान्तं प्रधावते नाडी
चक्रेण संसृते नासिकान्तमुभे गते १२ नाभि
मण्डलमाश्रित्य कुक्कुटाण्डमिव स्थिते मूला
धारं तु सा नाडी कण्ठयष्टुपाश्रिते १८

पिष्ठानचक्रादुद्गते नाडीचक्रेण संसृते स्वभावतो ना
सिकान्तं गतो उन्मीयमानदृशा यो नयनान्तं प्रधाव
त इति योजना १२ इदानीं नाडीनां तरोद्गमनस्थानमाह
नाभीति मणिपूरकचक्रस्थानमित्यर्थः नाभिमण्डल
स्योपमा कुक्कुटाण्डमिवेति तदाश्रित्य तमाश्रयोः ह
भयोरिति निर्गते मूलाधारं तु सा वेति प्रसिद्धे हे नाडी क
ण्ठयष्टु स्कन्ते नावसार्यन्तं प्रसृत इत्यर्थः १८

द॰ सा॰ टी ३७

पृष्ठालंबुसयोरन्तराले नाम्ना नाडी मण्डलाउरस्य शुक्ला
नाम तो वर्णितस्य शुक्ला नाडी भ्रूमध्यमुपसर्पति तत्र
वस्थितानां सरस्वत्याह्वया नाडी जिह्वान्ता जिह्वाग्रपर्यन्त
प्रसृता वाचः प्रसारणकर्त्री भवति अस्मा विश्वोदरी
नाम नाडी या लिसा ...... लोलंबोध्वभोगे
स्वामिमेतत्प्रकारं सर्वमदनीयं भुंक्ते जाठराग्निना
ः कर्म

नाडी शुक्ला ह्वया तस्माद्भ्रूमध्यमुपसर्पति स
रस्वत्याह्वया नाडी जिह्वान्ता वाक्प्रसारिणी १९
नाडी विश्वोदरी नाम भुंक्ते च सा चतुर्विधम् पीत्वा
पयस्विनी तोयकण्ठस्था कुरुते द्रुतम् २० ना
डी चक्रात्समुद्भूता नासुलिसस्वयोर्द्वयोः प
काशुकस्विनी वाली मूत्रमुत्सर्जयेत्कहृन्मलम् २१

37

एवमानं रसं ग्रसति पयस्विनी नाम्ना सा नाडी योयं
तोयं पीत्वा कण्ठस्थानस्थितानाम ...... कुरुते विश्वो
दरी जठरस्थाना पयस्विनी कण्ठस्थानेति ज्ञेयम् २०
एवमूर्ध्वगा नाडीः सकार्या अतः क्रमाद्योर्द्वयोस्ता
स्त्रस्थानुक्रमति नाडीचक्रादिति स्पष्टार्थः २१ ॥
॥ ॥

ग्रसाभुनः शंखि ... नाडीवक्रादेवोत्तताधमनीधमन
कश्रीभुक्तान्तानांतरसंसारमादायमूर्ध्निमस्तके सहस्रार
पद्मस्थाने सुधामसंतसञ्चितवेतस्थोपचयंकुरुते
शालविकायोगलभ्यमसृते योगिनस्तामित्यर्थः
किंकृत्वा कपालकुहरंशिरः कपालाकाशंगत्वा प्रा
प्त्यार्थः किंयसैनामसमाः शतसंख्यानाड्यः प्राणिद्वि
... द्वारमार्गभूता इत्युपसंहरति शतं चैका चेति

एका त्वरसमादायशंखिनीधमनीभुतः कपा
लकुहरंगत्वा मूर्ध्नि सञ्चितवेतस्थाम् २२
शतं चैका च नाड्यः स्युस्तासामेका शिरोगता
तयोर्ध्वमायन्नमृतः स्यादितिवेदान्तशासनं २३

तासामेकोत्तरशतनाडीनां मध्ये एका सुषुम्णाख्या नाडी
शिरो ब्रह्मरन्ध्रं प्रतिगता तस्याः कार्यमाह तयेति त
या नाड्या ऊर्ध्वमर्चिरादिमार्गेण ब्रह्मलोकं प्राप्य ता
च्छन्नमृतः स्यात् मुक्तः संसारबन्धनः स्यात् समाननिति वे
दान्तशासनं वेदान्तेषूक्तमित्यर्थः तथा च वेदान्तवाक्यं
शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका
तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति २४

इ.मा. टी ३८

इदांनीनाडीतेवतत्स्वभावकार्याद्यनुक्रमेणप्रबोधनं
विदात्मनोवस्थात्रयद्योतोपपत्तिमनुक्रमते यदेति अ-
यमर्थः यद्यत्कर्मायमावर्ततिजीवस्तदाबुद्धिगतस्तद्वि
दाभासद्वारातद्विविकल्पवकरोतितनस्वत इति स्थितिः
तथाचसर्वकार्यकर्मकृतोतिशयोबुद्धिगतएवेति बुद्धि
गतैः पुण्यैरितस्मृते इमेवंबुद्धिगतैः पुण्यैः प्रेरितानी
न्द्रियाणिपुण्यत्रहृणेश्रेष्ठ[illegible]नतस्थापफलाहृमर्थ
सकल्याणदर्शनादेरपिदर्शनात् तस्मात्तेनोभयंपरूप

वतोबुद्धिगतैः पुण्यैः प्रेरितेन्द्रियमार्गतः शब्दा
दिविषयान्भुंक्ते तदा जागरितं भवेत् २४

38

तीस्मादित्यक्तेश्च तथाचयथादेशकालनिमित्तो
द्भवपुण्यपापप्रेरितेन्द्रियमार्गैः पूर्वोक्तनाडीभि
स्तत्तदिन्द्रियगोलकस्थानप्रसृताभिर्देहाकाशाद्ब
हिः प्रसर्पद्भिरिन्द्रियैरितियावत् यदायंवि
शब्दादिविषयान्देहवाह्यानाध्यात्मिकांश्चभुंक्ते प्र
मत्तादिभिः प्रमाणैरनुभवति तदास्यजागरितं
जाग्रदवस्थाभवेदित्यर्थः तथाचोक्तम् इन्द्रिये
थ्योप
गरितमिति २४

स्वप्नावस्थाप्राप्तिमाह संलीनेष्विति पञ्चेन्द्रियेषु देहा
गतनाडीछिद्रेषु सत्सु नाडीजालसूत्रेणान्तःकरणे
न प्राणसंहितेन तत्तद्गोलकस्थानेभ्योऽन्तर्नीतेषु स
त्स्वित्यर्थः तदा पुमानात्मा मानसान्जाग्रत्संस्कारवा
सितमनः परिणामरूपान्विषयान्भुङ्क्ते तदा स्वप्नाव
स्था भवेत् तदप्युक्तं कर ······ पसंल्लीनेषु जागरितसं
स्कारजः प्रत्ययः सविषयः स्वप्न इति २५ सुषुप्त्यवस्था
माह मनस इति सवासनस्य मनसः कारणरूपेणा
वस्थानमुपसंहारः ··· यदा भवेत्तदास्यात्मनः सुषु

संलीनेष्विन्द्रियेषु जाग्रत्संस्कारजान्पुमान्
मानसान्विषयान्भुङ्क्ते स्वप्नावस्था तदा भवेत् २६
मनसोऽप्युपसंहारः सुषुप्तिरिति कथ्यते तत्रा
मायासमाच्छन्नः सन्मात्रो वर्तते पुमान् २७

प्तिरिति कथ्यत इत्यर्थः तदुक्तं सर्वप्रकारज्ञानोपसं
हारे बुद्धेः कारणात्मनावस्थानं सुषुप्तिरिति यस्मादे
वमुपाधिगतविशेषावस्थोपाधिका एव चिदात्मनो
जाग्रदाद्यवस्था उपाधीनां च मायां विना चिदात्मसंब
न्धासम्भवस्य यस्मादयं पुमानात्मा मायासमाच्छन्नः
समाहृतत्वस्वभावः सन्मात्रो लीनसर्वव्यवहारयोप
मात्रो वर्तते यद्वा सन्मात्रो निर्विकल्पकसन्मात्राप
यं पुमान्मायासमाच्छन्नो वर्तत इति योजना २७

द·मा· नलिंगमाह सुप्त इति स्वभावतश्चिदानन्दरूपेऽस्मि
टी न्ह्यविषयत्वादज्ञानाविषयेऽकथमस्यापि सुप्तोत्थायवभा
३९ सइतिभावः सर्वदास्वप्रकाशचिदानन्दएवात्मेत्य
त्रापिलिंगमाह सर्वमिति अयमर्थः सर्वमितिस्वरू
पमनागनन्तकस्वप्रकाशसदानन्दरूपपरामृश्यते अ
स्याम्भिस्वगाढ्युपशमः नचसुषुप्तावागन्तुकं सु
खमस्तितत्साधनाभावात् नचव्यापारोपशमएवोप
पाध्युपशमकृतः सर्वसाधनमन्यानिवृत्तिमात्रेण
न्योमतेरदृष्टत्वात् अभावाद्भावोत्पत्तेरंगीकार
अनचदुःखाभावएवसुखशब्देनोच्यते इतिवाच्यं

सुप्तोत्थितस्यैवमायाविशात्प्रकाशते सुख
मस्वाप्समिमेवं प्रबोधसमयेप्युमान् सच्चिदानन्दरू
नस्यसुखस्यानुभवसा पः सन्स्वयमेवप्रकाशते २०

धनाभावात् अननुभूतपरामर्शायोगात् नचैवंसौषुप्त
दुःखाभावानुमानेनस्मरणमितिवक्तव्यं अस्मर्यमाण
त्वाद्दृष्टभिचाराज्ञानम अभावादेश्चासिद्धेरितिविस्तरतम
यत्रैमास्तातावत् तस्मात्यथावर्णितस्वरूपमेवतदा सर्व
तथानिष्क्रियस्यनिरंशस्यचिदात्मनोनशयनंगमनंवास्व
पः प्रबोधोवास्वतःसंभवति अतउपाधिकृतमेवेत्सर्वं
मिस्वगाढ्युपशमएवास्यस्वापस्तस्याभिमुखलिखितइति
अतःसर्वावस्थास्वसच्चिदानन्दरूपएवायमात्मेत्यर्थः
तदुक्तंवार्तिके नहिस्वस्यविनाभूतेलिंगमस्यनिरीक्ष्य
ते येनसौषुप्तमद्वानन्तमिदानीमनुमीयतइति २०

39

एवंवर्णितेश्वरमूलसंगतिंविशदयति जगत्कारणंका
र्यंचाखिलात्मना तत्कार्यद्वयात्मकमवस्थात्रयंस्वमाययास
माविश्यविश्वतेजसप्राज्ञरूपेण वैश्वानरहिरण्यगा
र्भाव्याकृतरूपेणचाध्यात्ममधिदैवंचभासमानेमहे
श्वरेसतिसूर्यादयोपिसर्वार्थप्रकाशकतयास्वप्रकाशस्व
भावा अपिभासन्तेनस्वमहिम्ना तथाप्रकाशस्वभावत
याप्रसिद्धानांघटादिविषयाणांकुतःस्वभावप्रकाश

इत्थंजगत्समाविश्यभासमानेमहेश्वरे सूर्या
दयोपिभासन्तेकिंपुनर्नामघटादयः २८ त
स्मात्सत्ताचभावानामीश्वराश्रयणाश्रया २९

स्वभावतयाप्रसिद्धानांघटादिविषयाणांकुतःस्वभा
वप्रकाशशंकेत्यर्थः तस्मादीश्वरएवसत्तास्फुरत्तेति
यते तत्स्वरूपकोदेवचान्यत्रोमेतत्सिद्धमित्युपसंहरति
तस्मादितिचकारात्स्फुरत्तागृह्यते ईश्वरमाश्रयन्त इतीश्व
राश्रयणाईश्वरस्थानमाः तेषामाश्रयोपाधयस्ताःसेश्वराश्रयणाश्र
याईश्वराध्यस्ताविषयाश्रयानस्वरूपमधिष्ठायगतेत्यर्थः २९

द॰मा
टी
५

ईश्वरस्यैवतत्पदसमानाज्ञानस्वरूपत्वेप्रमाणमाह श्रुत्यासत्य
ज्ञानानन्तशब्दैर्ब्रह्मणोलक्षणमुक्तं समस्तज्ञानमनन्तं ब्र
ह्मेतिलक्षणंचसजातीयविजातीयव्यावर्तकंसत्त्वरूप
मात्रपर्यवसितमुच्यते यदाहुस्तार्किका अपि असाधारण
धर्मोलक्षणमिति तत्रयतोवाइमानिभूतानिजायन्ते इ
त्यादिवाक्येनब्रह्मोपलक्षणंदर्शयतिजगत्कारणत्वेनोप
लक्षितस्यवादिकल्पितप्रधानपरमाण्वादौप्रसंगेजगत्
कारणत्वेनब्रह्मसजातीयाः प्रधानादयः प्रस्तुपस्थिताः
विजातीयाश्चेतोभौतिकरूपाः कार्यवर्गास्तेभ्य [illegible]

समस्तज्ञानमनन्तत्वंचयस्माद्ब्रह्मोपदिश्यते
जाग्रत्स्वप्नाद्यंविश्वमसत्संजडमसत्यवत् १०

विधेयत्वेनानन्तजडपरिच्छिन्नस्वभावेभ्योव्यावृत्तंब्रह्म
स्वरूपंबोधयतीदंवाक्यमिति स्थितेसमस्तज्ञानेसमस्ता
स्फुरत्तारूपंब्रह्मणःपदसामानाधिकरण्यार्थमीनांसम्यक्स
विदितिनिश्चीयतइत्यभिप्रायः एतच्छ्रुतिबलात्सिद्ध
मित्याह जाग्रदिति अथवाअस्माद्ब्रह्मणिसमस्तत्वाद्य
वधारणादसिद्धमर्थमाह जाग्रदितिविश्वमसत्समस्तं
जडत्वान्मृगतृष्णिकोदकवत् विमतंजडंपरायो
नचेष्टत्वाद्यपंत्रवदित्यर्थः २॥

40

एवं सर्वजगदधिष्ठानतया सर्वानुस्यूतस्येश्वरस्य सर्वसत्तास्फु-
रत्तामुपपाद्य तस्यैव प्रत्यगात्मत्वं पूर्वश्लोकोक्तमुपपादयति
ईश्वरोहमिति सर्वजन्तुषु भासते स ईश्वर एवेति योजना प्रति-
ज्ञातमर्थमुपपादयितुमहंकारं भिनत्ति निर्विकल्पोस्मीति २१
तत्र निर्विकल्पोहमेव भासमईश्वरविषय एवेत्याह ब्रह्मणो
निर्विकल्पत्वं विशदयति निर्धूताविलेति निरस्तसमस्त
विषयतयाहमित्येव भासमानस्यात्मा ब्रह्मविशेषणार्थः तदेव
दृष्टान्तेन स्पष्टयति पूर्णमन्यकारेति २२ नैवमात्मा कदा-

ईश्वरस्याहमित्येवं भासते सर्वजन्तुषु निर्विक-
ल्पश्च शुद्धश्च मलिनश्चेत्यहंविधा २१ निर्विक-
ल्पं परं ब्रह्म निर्धूताविलकल्मषम् पूर्णमन्य-
कारधूमाभ्रविमुक्तगगनोपमम् २२ विवेक-
समये शुद्धदेहादीनामपोहनात् यथाकाशवि-
संकलितमपि न तैः किंचिद्दीसते २३ ॥

पि भासतेऽहमित्यंशकास्वभावतः सर्वेषामेवं भानाभावे-
पि विचारितत्वंपदार्थेनान्यकदाचिद्गतमवेदि सोभिप्र-
त्यतत्त्वायने शुद्धमहंकारस्तदाहइति विवेकसमये देहादी-
नामात्मत्वेनाहमेवभासमपोहनात् परिच्छेदकाभावा-
च्छुद्ध एवात्मतत्त्वं ब्रह्माभासत इत्यर्थः विवेकसमये भास-
मानमाकारं दृष्टान्तेन स्पष्टायन्नस्य समानाद्भुतभाना-
द्विशेषमाह यथाकाशस्थितमिति संकलितमनतैरुपपा-

द॰मा॰ नप्रकाशेहृपलक्षितमन्तरिहमाकाशं यथा किञ्चिदी॰
टी क्षतइतीक्षणकालस्यकिञ्चित्त्वाभिप्रायेमवृमित्यर्थः ३२
४ ततीयमहंकारंसर्वप्राणिसाधारणमाह समस्तोध्यासः
अनवकाशवस्तुरिवछिन्नमिवेस्फुर्त ३६ त्रिविधाहंकारवि
देशप्रयोजनमाह यदेतिप्रबोधे यमनिर्दोवेत्यस्यवयाति
अत्रजीवस्यसर्वज्ञत्वादिभवनंनविधीयते किन्तुसर्वत्र

देहेन्द्रियादिसंसर्गान्मलिनंकलुषीकृतं यथाका
शंतमोरूपस्फुरमनवकाशवत् १४ अहमित्यस्फुर
भावंयदाजीवः प्रबुध्यते सर्वज्ञः सर्वकर्ताचतदादे
वोभविष्यति १५ माययाधिकमंमूढोविषयै
श्चप्रकाशितः निर्विकल्पात्मसंस्थानेस्वस्वरूपात्म
प्रकाशिते १६ अविद्याव्यवधानस्यापायोपरमे
श्वरः दक्षिणामूर्तिरूपोसौस्वयमेवप्रकाशते १७
इतिश्रीदक्षिणामूर्तिस्तोत्रार्थप्रतिपादकेप्रबं
धेमानसोल्लासेचतुर्थोल्लाससंग्रहः १८ ४

त्वाद्युपलक्षितस्वस्वरूपेणाभिव्यक्तोभविष्यतीत्यर्थः १५
कथमस्यास्वात्मत्वाभिव्यक्तिस्तात्विकीत्याशङ्कानका
र्यः सत्वस्यजीवस्यैश्वर्यंमायानिबन्धनत्वादिमभिप्रेत्याह
तस्मान्मायानिहृत्येनिर्विकल्पात्मावभासनेयत्नःकार्य
इत्याह निर्विकल्पात्मसंस्थानइति १६ प्रकरणार्थमुपसंहर
ति १७ चतुर्थश्लोकार्थमुपसंहरति १८ चतुर्थोल्लासः
४

पूर्वं लोकायतमतेन प्रत्यक्षादिप्रमाणाभासनिबन्धना
वस्तान्मैकावाकार्थविशेषशंकापरिहृते तदानीं पञ्चमे
न श्लोकेन प्राकृतकानां मतिविलसितकल्पनानिबन्ध
नाविशेषशंकाप [illegible] तेषां मतानुपमस्यति परमना
स्तिकश्चार्वाकोमममते एकं प्रत्यक्षमेव प्रमाणं नानुमा
नादीनीति ग्रन्थस्यायमभिप्रायः प्रत्यक्षातिरिक्तेन प्रमाणे
न यदसीति यदुक्तं तद्यावत्प्रत्यक्षेण न संभाव्यते तावत्तेन
विश्वासोऽपि भवति भूयः श्रुतेषु व्यभिचारोपलंभात्प्रत्यक्ष
स्य च व्यभिचारानुपलंभात् अतः प्रत्यक्षमेकमेव प्रमाण
मिति भूतचतुष्टयं पृथिव्यप्तेजोवायवस्तत्त्वपदार्थाः

प्रमाणमेकं प्रत्यक्षं तत्त्वं भूतचतुष्टयम्
मोक्षश्च मरणं नाम कामार्थौ पुरुषार्थकौ ॥ १

न त्वाकाशादयः पदार्थाः सन्ति तेषामप्रत्यक्षत्वात् इहाधु
निःस्वाकं प्रत्यक्षत्वपवेत्यभिप्रायः प्रमाणप्रमेयवोक्ता पु
रुषार्थेत्वमाह मोक्षश्चेति मरणादन्यो नास्ति मोक्षो ना
म पुरुषार्थ इत्यर्थः चकाराद्धर्मोऽपि न पुरुषार्थ इति समुच्ची
यते पारिशेष्यात्कामार्थौ द्वौ प्रत्यक्षसिद्धौ पुरुषार्थकौ
पुरुषेणाभिलषणीयौ संपाद्यौ च तत्रार्थः कामसा
धनत्वेनैवाभिलाषगोचरः कामस्तु स्वात्मादिति विवेकः
न तु भूतचतुष्टयमेव प्रमेयमिति कृतस्तस्य परिणामयि
तुरीश्वरस्य तत्सिद्धिलक्षणस्यांगीकरणीयत्वात् तथा जन्म
न यवप्राणिनां स्वस्वभावः स्वैर्वैविध्यदर्शनात् तद्धेतुस्तत्पूर्व

